[९] पित्पर्यायवचनस्य[1] च स्वाद्यर्थम्। (म.भा. १.१७७)

[2]पिन्निर्देशः कर्तव्यः। ततो वक्तव्यं [3]पर्यायवचनस्य ग्रहणं भवति, चकारात्[4] स्वस्य रूपस्य[5] तद्विशेषाणां च इति। किं प्रयोजनम्? स्वाद्यर्थम्। 'स्वे पुषः' (३.४.४०/३३६१)। स्वपोषं पुष्टः[6]। रैपोषम्[7]। धनपोषम्। अश्वपोषम्। गोपोषम्।

[१०] जित्पर्यायवचनस्यैव राजाद्यर्थम्। (म.भा. १.१७७)

जिन्निर्देशः कर्तव्यः। [8]ततो वक्तव्यम् पर्यायवचनस्यैव ग्रहणं भवति [9]इति, न स्वरूपस्य, नापि [10]तद्विशेषाणाम्। किं प्रयोजनम्? राजाद्यर्थम्। 'सभा राजाऽमनुष्यपूर्वा' (२.४.२३/८२६) –इनसभम्। ईश्वरसभम्। [11]तस्यैव न भवति– राजसभा। तद्विशेषाणां च[12] न भवति–[13]पुष्यमित्रसभा। चन्द्रगुप्तसभा।

[११] [14]झित्तद्विशेषाणां च मत्स्याद्यर्थम्। (म.भा. १.१७७)

झिन्निर्देशः कर्तव्यः। ततो वक्तव्यम् तस्य च ग्रहणं भवति तद्विशेषाणां च [15]इति। किं प्रयोजनम्? [16]मत्स्याद्यर्थम्। 'पक्षिमत्स्यमृगान् हन्ति' (४.४.३५/१५८५) इति ठक्–[17]पाक्षिकः। मात्स्यिकः[18]। तद्विशेषाणाम्[19]–[20]शाकुनिकः। पर्यायाणां न भवति–अजिह्मान् हन्ति, अनिमिषान्[21] हन्ति इति। [22]अथैकस्येष्यते (म.भा. १ १७७), मीनान् हन्ति इति[23] मैनिकः[24] ॥

## अणुदित् सवर्णस्य चाप्रत्ययः। (६९/१४)

परेण णकारेण प्रत्याहारग्रहणम्[25]। अण्[26] गृह्यमाण उदिच् च [27]सवर्णानां ग्राहको भवति, स्वस्य च रूपस्य, प्रत्ययं वर्जयित्वा। 'आद् गुणः' (६.१.८७/६९), 'अस्य च्वौ' (७.४.३२/२११८), 'यस्येति च' (६.४.१४८/३११)। स्वरानुनासिक्यकालभिन्नस्य[28] ग्रहणं भवति। (म.भा. १. १७८)। उदित् खल्वपि। 'चुटू' (१.३.७/१८९), 'लशक्वतद्धिते' (१.३.८/१९५)। [29]चवर्गटवर्गयोः कवर्गस्य च ग्रहणं भवति। अप्रत्ययः इति किम्? [30]'सनाशंसभिक्ष उः' (३.२.१६८/३१४८), 'अ साम्प्रतिके' (४.३.९/१३७९), दीर्घो न भवति ॥

## तपरस्तत्कालस्य। (७०/१५)

[31]तः परो [32]यस्मात् सोऽयं तपरः, तादपि परः तपरः। तपरो वर्णस्तत्कालस्य, आत्मना तुल्यकालस्य गुणान्तरयुक्तस्य सवर्णस्य ग्राहको भवति, स्वस्य च रूपस्य। विध्यर्थमिदम्[33]। अण् इति [34]नानुवर्तते। अणामन्येषां च तपराणाम् इदमेव

---

1. अन्यरूपस्य तद्विशेषाणाम् इत्यधिकम् ह. 2. निर्देशः क.ड. 3. पित्पर्याय ग.ह., पर्यायस्य ग, पर्यायस्य च ड. 4. च इत्यधिकं ड.ह. ई. 5. रूपस्य नास्ति ग. 6. पुष्टः नास्ति क. 7. नास्ति ड. 8. वाक्यमिदं नास्ति ह. 9. इति नास्ति क. 10. तद् नास्ति फ. 11. स्वस्यैव ग. 12. च नास्ति फ. 13. पुष्पमित्रसभा क.फ. 14. झित् तस्य च ह. 15. ग्राहकं इत्यधिकम् ह, ग्रहणं इत्यधिकम् ग. 16. नास्ति ड. 17. नास्ति क.ड.फ.ह. 18. मात्सकः फ, मात्सिकः ह, मार्गिकः अ. 19. च इत्यधिकम् क. फ. 20. शाकुलिकः क, शाकलिकः, शाष्कुलिकः ह. 21. अनिर्दिष्टान् ह. 22. अस्यैकस्य पर्यायवचनस्येष्यते ब. क. ड. ह. ई. 23. इति नास्ति क. ड. ह, मीनान्––मैनिकः नास्ति ह. 24. इति इत्यधिकम् फ. 25. भवति इत्यधिकम् ग. 26. अनुदिच्च गृह्यमाणः क. 27. सवर्णस्य ग.फ.ह. 28. अपि इत्यधिकम् क. ड. फ, नासिक्यकाले भिन्नस्य च ग. ह. 29. चवर्गस्य टवर्गस्य ह. 30. चिकीर्षुः इत्यधिकम् क. ड. 31. तः परो यस्मात् स तपरः। तादपि परः तपरः। तपरो यो वर्णः तत्कालस्य आत्मनः तुल्यकालस्य ह. 32. अस्मात् क. ड. 33. सूत्रम् इत्यधिकम् क. ग. 34. न वर्तते ग.